# Vrindavanashtakam 2

# वृन्दावनाष्टकम् २

## Document Information

Text title : vRRindAvanAShTakam 2

File name : vRRindAvanAShTakam.itx

Category : vishhnu, aShTaka, tulasI, devii, devI

Location : doc_vishhnu

Author : Visvanatha Chakravarti Thakura

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji, also from Stamrita Lahari

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 25, 2021

*sanskritdocuments.org*

# वृन्दावनाष्टकम् २

न योगसिद्धिर्न च माऽस्तु मोक्षो वैकुण्ठलोकेऽपि न पार्षदत्वम् ।
प्रेमापि न स्यादिति चेत्तरां तु ममास्तु वृन्दावन एव वासः ॥ १॥

तार्णं जनुर्यत्र विधिर्ययाचे सद्भक्तचूडामणिरुद्धवोऽपि ।
वीक्ष्यैव माधुर्यधुरां तदस्मिन् ममास्तु वृन्दावन एव वासः ॥ २॥

किं ते कृतं हन्त तपः क्षितीति गोप्योऽपि भूमेः स्तुवते स्म कीर्तिम् ।
येनैव कृष्णाङ्घ्रिपदाङ्कितेऽस्मिन् ममास्तु वृन्दावन एव वासः ॥ ३॥

गोपाङ्गनालम्पटतैव यत्र यस्यां रसः पूर्णतमत्वमाप ।
यतो रसो वै स इति श्रुतिस्तन्ममास्तु वृन्दावन एव वासः ॥ ४॥

भाण्डीरगोवर्धनरासपीठैस्त्रिसीमके योजनपञ्चकेन ।
मिते विभुत्वादमितेऽपि चास्मिन् ममास्तु वृन्दावन एव वासः ॥ ५॥

यत्राधिपत्यं वृषभानुपुत्र्या येनोदयेत्प्रेमसुखं जनानाम् ।
यस्मिन्ममाशा बलवत्यतोऽस्मिन् ममास्तु वृन्दावन एव वासः ॥ ६॥

यस्मिन्महारासविलासलीला न प्राप यां श्रीरपि सा तपोभिः ।
तत्रोल्लसन्मञ्जुनिकुञ्जपुञ्जो ममास्तु वृन्दावन एव वासः ॥ ७॥

सदा रुरुन्यङ्कुमुखा विशङ्कं खेलन्ति कूजन्ति पिकालिकीराः ।
शिखण्डिनो यत्र नटन्ति तस्मिन् ममास्तु वृन्दावन एव वासः ॥ ८॥

वृन्दावनस्याष्टकमेतदुच्चैः पठन्ति ये निश्चलबुद्धयस्ते ।
वृन्दावनेशाङ्घ्रिसरोजसेवां साक्षाल्लभन्ते जनुषोऽन्त एव ॥ ९॥

इति श्रीविश्वनाथचक्रवर्तिविरचितं वृन्दावनाष्टकं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Vrindavanashtakam 2*

pdf was typeset on November 25, 2021

Please send corrections to *sanskrit@cheerful.com*